Homas
the spiritual way to success
K. Krishna Prasad Bhat
Website: http://homas.in
Email: homasonline@gmail.com
Mobil: 8000858858 /9940406777



अथ नीलकण्ठमन्त्रप्रसङ्गात् रक्षाप्रधानआपदुद्धारणमन्त्रोपि शिवकिङ्करत्वेन मन्त्रदेवताप्रकाशिकोक्तप्रकारेण लिख्यते —

बृहदारण्यक ऋषिः । अनुष्टुप् छन्दः । आपदुद्धारणो महावटुकभैरवो देवता । ह्रूं वां हृत् । ह्रीं वीं शिरः । इत्याद्यङ्गानि । ह्रां वां बीजम् । ह्रीं वीं शक्तिः । ह्रुं वूं कीलकम् । भूतप्रेतपिशाचाद्युच्चाटनार्थे विनियोगः ।

---

यन्त्रान्तरम् —

अर्धचन्द्राकृतिं कृत्वा मध्ये वारुणमालिखेत् ।
कोणद्वये तु जुं सं च ठंकारेण तु वेष्टयेत् ।
एतद्यन्त्रं महावीर्यं दर्शनात्पावनं परम् ॥
यस्त कीलालमत्राभिः मद्य(मत्र)ज्यति न संशयः ।

तत्र वं इति वरुणबीजम् ।

करकलितकपालः कुण्डली दण्डपाणिः
तरुणतिमिरनीलो व्यालयज्ञोपवीती ।
क्रतुसमयसपर्याविघ्नविच्छेदहेतुः
जयति वटुकनाथः सिद्धिदस्साधकानाम् ॥

ओं श्रीं ह्रीं क्लीं क्ष्म्र्यूं वटुकाय आपदुद्धारणाय कुरु कुरु वटुकाय ह्रीम् । इति मन्त्रः पञ्चविंशतिवर्णः । तावल्लक्षं जपः । त्रिमधुरसिक्तैः तिलैर्दशांशं पुरश्चरणाहोमः ॥

अस्यैव यन्त्रमाह—

श्रीमायास्मरकूटमत्र विलिखेत् मध्ये दळेष्वष्टसु
द्विः प्रोक्तं वटुकायशब्दमपरान्मन्त्रस्य वर्णान् बहिः ।
अष्टद्वन्द्वदळेषु तद्बहिरचस्तत्संख्यपत्रेष्वथो
यो द्वात्रिंशदळकादिसान्तसहितं यन्त्रं लिखेद्भूपुरे ॥

अस्यार्थः— प्रथममष्टपत्रं विलिख्य तत्कर्णिकायां प्रणवं विलिख्य, तन्मध्ये श्रीं ह्रीं क्लीं क्ष्म्र्यूं इति चतसृषु दिक्षु विलिख्य तन्मध्ये साध्यनामादीन्विलिखेत् । पुनरष्टदळेषु वटुकाय वटुकायेति द्विरुक्तपदस्यैकैकमक्षरं विलिखेत् । तद्बहिष्षोडशदळं पद्मं विलिख्य, तेषु आपदुद्धारणाय कुरु कुरु वटुकाय ह्रीं एतान्वर्णानेकैकं विलिख्य, तद्बहिष्षोडशदळेषु षोडशस्वरान्विलिख्य तद्बहिर्द्वात्रिंशदळपद्मं विलिख्य, कादिसान्तान् एकैकमक्षरं विलिख्य, तद्बहिः चतुरश्रं विलिखेत् । एतद्यन्त्रं रक्षाकरं भवति ॥

अथ पूजा—

व्योमपद्माङ्कितत्रिकोणषट्कोणवृत्ताष्टदळचतुरश्रात्मकं चक्रं विलिख्य, श्रीं ह्रीं नमः इत्युच्चार्य पुष्पाञ्जलिं विकीर्य, तस्मिन्भैरवं मूलेनावाह्य, मूलेन ईशानादिपञ्चमन्त्रैश्चावाहनादिमुद्राः प्रदर्श्य, देवतातनौ षडङ्गादीन्विन्यस्य,

पाद्यादीनङ्गमन्त्रैर्दत्वा, ईशादिपञ्चमन्त्रैः ऊर्ध्वपूर्वादिपञ्चवक्त्रेषु अभ्यर्च्य, षडङ्गमन्त्रैः हृदयादिषु संपूज्य, परिवारानर्चयेत् । तद्यथा —

श्रीं ह्रीं ईशान वटुकभैरवपादुकेभ्यो ह्रीं श्रीं नमः । श्रीं ह्रीं वामदेव वटुकभैरवपादुकेभ्यो ह्रीं श्रीं नमः । इत्यादिपञ्चमन्त्रान् मध्यमाग्रदक्षिणोत्तर-पश्चिमेषु, कर्णिकायामेव प्रथमावरणम् । अग्नीशासुरवायुकोणेषु पुरतो दिक्षु षडङ्गैर्द्वितीयावरणम् । श्रीं ह्रीं असिताङ्गभैरवपादुकेभ्यो ह्रीं श्रीं नमः । एवमेव रुरुभैरवचण्डभैरवक्रोधभैरव उन्मत्तभैरवकपालीभैरवभीषणभैरव संहारभैरव इति व्योमपद्माष्टदलेषु पूर्वादीशान्तं असिताङ्गभैरवाद्यष्टकेन तृतीयावरणम् । व्योमपद्ममिति कर्णिकावृत्तविशिष्टपद्ममित्यर्थः । श्रीं ह्रीं डाकिनीपुत्रपादुकेभ्यो ह्रीं श्रीं नमः । एवमेव राकिनीलाकिनीशाकिनीहाकिनीकाकिनीः पूर्वादिषट्-कोणेषु डाकिनीपुत्रादिषट्केन चतुर्थावरणम् । तद्बहिः कर्णिकावृत्ते श्रीं ह्रीं शाकिनीपुत्रवटुकेभ्यो ह्रीं श्रीं नमः इत्यादि मालिनीपुत्र-मन्त्रपुत्र-उमापुत्र-रुद्र-पुत्र-ऊर्ध्वमुखीपुत्र-शक्तिपुत्र पादुकेभ्यो ह्रीं श्रीं नमः । इति शाकिन्यादिसप्तकं षट्कोणबाह्यकर्णिकावृत्ते ऐशान्याद्यग्निपर्यन्तं, श्रीं ह्रीं गणपतिपादुकेभ्यो ह्रीं श्रीं नमः ॥ एवमेव क्षेत्रपाल महाशास्तृ वटुकनाथ इति गणपत्यादिकुमारचतुष्कं *तत्कर्णिकावृत्ते आग्नेयादिनैर्ऋत्यान्तं, श्रीं ह्रीं देवीपुत्रपादुकेभ्यो ह्रीं श्रीं नमः* इत्यादिमातृपुत्र कुलपुत्र एतत्स्थानाधिपति एतद्देशाधिपति एतद्ग्रामाधिपति (इति) देवीपुत्रादिषट्कं तत्कर्णिकावृत्ते नैर्ऋत्यादिवायव्यान्तं, श्रीं ह्रीं मेघनाथ-पादुकेभ्यो ह्रीं श्रीं नमः । इत्यादि प्रचण्डोग्र कालदूत मेघनादादि पुत्रत्रिकं तत्कर्णिकावृत्ते वायव्यादीशान्तमिति । शाकिन्यादिबालसप्तकसहितं, गणपत्यादि-कुमारचतुष्कं, देवीपुत्राद्यधिपादिषट्कं, मेघनादादिपुत्रत्रिकं इत्येतैस्सर्वैः मिळित्वा विंशद्देवताभिः पञ्चमावरणम् ॥

ततस्तद्बाह्ये श्रीं ह्रीं मङ्गळापुत्रपादुकेभ्यो ह्रीं श्रीं नमः । एवमेव

चर्चिकापुत्र योगेशीपुत्र हरसिद्धापुत्र भट्टारीपुत्र किलिकिलापुत्र कालरात्रिपुत्र विभीषिकापुत्र इति पूर्वाद्यष्टदळकेसरेषु मङ्गळापुत्राद्यष्टकेन षष्ठावरणम् ॥

ततस्तद्बाह्ये श्रीं ह्रीं ब्रह्माणीपुत्रपादुकेभ्यो ह्रीं श्रीं नमः । एवमेव माहेश्वरी-पुत्र, कौमारीपुत्र, वैष्णवीपुत्र, वाराहीपुत्र, इन्द्राणीपुत्र, चामुण्डापुत्र, महालक्ष्मीपुत्र, इति पूर्वाद्यष्टदळेषु ब्रह्माण्यादिमातृपुत्रैः सप्तमावरणम् ॥

पुनस्तद्बाह्ये श्रीं ह्रीं इन्द्रवटुकपादेभ्यो ह्रीं श्रीं नमः । इत्यादि ब्रह्म-वटुकान्तं चतुरश्राभ्यन्तरप्राकारे प्रागादीन्द्रवटुकादिदशकेनाष्टमावरणम् । पुनस्त-द्बाह्ये श्रीं ह्रीं हेतुकभैरवपादुकेभ्यो ह्रीं श्रीं नमः इत्यादित्रिपुरान्तभैरव, अग्निभैरव, वेताळभैरव, अग्निजिह्वाभैरव, कराळभैरव, काळभैरव, भीमरूप-भैरव, अचलभैरव, श्रीं ह्रीं हाटकेश्वरभैरवपादुकेभ्यो ह्रीं श्रीं नमः इति चतुरश्रस्य मध्यप्राकारे प्रागादिहेतुकादिदशकेन नवमावरणम् । श्रीं ह्रीं वज्रिणी-पुत्रदशकेन पूर्वादिदिक्षु दशमावरणम् । एवं भैरवं संपूज्य बलिं दद्यात् ॥

शाल्यन्नं पललं सर्पिर्लाजचूर्णानि शर्करा ।
गुळमिक्षुरसापूपौ मध्वक्तैः परिमिश्रितैः ॥

कृत्वा कवलमाराध्य देवं प्रागुक्तवर्त्मना ।
रक्तचन्दनपुष्पाद्यैः निशि तस्मै बलिं हरेत् ॥

ततस्सिद्ध्यन्ति कार्याणि बलिनाऽनेन मन्त्रिणाम् ।

तत्र पललमिति तिलम् ॥

अथास्य नित्यबलिः —

भोजनवेळायां घृतगुळव्यञ्जनादिसहितं सक्तुं निर्वर्त्य, मूलविद्यां त्रिवारं जप्त्वा, कृष्णाय शुने दद्यात् ॥

अथ प्रयोगः —

जुहुयात्सर्पिषा मन्त्री महतीं श्रियमाप्नुयात् ।
वश्याय जुहुयादिक्षुशकलैर्वशयेज्जनान् ॥

इक्षुशकलं-नावतसाखर ॥

जुहुयात्पुत्रलाभाय प्रफुल्लैः कैरवैस्सुधीः ।
धनधान्यादिसंपत्त्यै जुहुयात्तिलतण्डुलैः ॥

बिल्वप्रसूनैर्जुहुयात् महतीं विन्दति श्रियम् ।
लोणैर्मधुरसंमिश्रैः वशयेद्वनिताजनान् ॥

लोणं-लवणम् ॥

वृष्टिकामेन होतव्यं वेतसस्य समिद्वरैः ।

वेतसं-नीर्वञ्जि । लतिकाविशेषः ।

अन्नेन जुहुयान्नित्यं धनधान्यादिसंपदे ॥

वश्याय जुहुयान्मन्त्री, मधुना दिवसत्रयम् ।
रोगोक्तौषधहोमेन रोगो नश्यति तत्क्षणात् ॥

कृत्याद्रोहे ग्रहद्रोहे भूतापस्मारसंभवे ।
व्याघ्रासने समासीनो जुहुयादयुतं तिलैः ॥

भूतादयः पलायन्ते नेक्षन्ते तां दिशं भयात् ।
जुहुयात्केवलैर्लोणैरयुतं स्तम्भनेच्छया ॥

निगळादिविमोक्षाय प्रयोगोयमुदाहृतः ।
वचाचूर्णं पलं जप्तं गव्येनाज्येन लोळितम् ॥

विभज्य भक्षयेन्मन्त्री मण्डलं पुत्रकांक्षया ।

विनीतं पुत्रमाप्नोति मेधारोग्यबलान्वितम् ॥

वचा-वेखण्ड । वचाचूर्णे पलप्रमाणे गव्याज्यं विसृज्य प्रतिदिनमष्टोत्तर-सहस्रं जप्त्वा मण्डलं प्राशयेत् ॥

अथ भस्मप्रयोगः —

साधयेन्मनुनाऽनेन भस्म सर्वार्थसिद्धिदम् ।
उशीरं चन्दनं कुण्ठं घनसारं सकुंकुमम् ।
श्वेतार्कमूलं वाराहीलक्ष्मीक्षीरमहीरुहाम् ॥

त्वचो बिल्वतरोर्मूलं शोषयित्वाऽथ चूर्णयेत् ।
चूर्णं व्योम्नि गृहीतेन गोमयेन विमर्दितम् ॥

कृत्वा पिण्डानि संशोष्य संस्कृते हव्यवाहने ।
मूलेन दग्ध्वा तद्भस्म शुद्धपात्रे विनिक्षिपेत् ॥

केतकीमालतीपुष्पैः वासयेद्भस्म शोधितम् ।
अयुतं प्रजपेन्मन्त्रं स्पृष्ट्वा भस्म सुपूजितम् ॥

एतदादाय दिनशः प्रातः पुण्ड्रं करोति यः ।
तस्य रोगाः प्रणश्यन्ति कृत्याद्रोहमहाग्रहाः ॥

अस्यार्थं षड्विंशपटलेऽघोरभस्मविधाने वक्ष्यामः ॥

अथापदुद्धारणप्रसङ्गात् स्वर्णाकर्षणभैरवमन्त्रोपि लिख्यते —

दूर्वासो भगवानृषिः । देवीगायत्री छन्दः । स्वर्णाकर्षणभैरवो देवता । ह्रां बीजम् । स्वाहा शक्तिः । संकल्पसिद्ध्यर्थे जपे विनियोगः । ओं ह्रां महाभैरवाय हृत् । ओं ह्रीं अपणस्याप शिरः । ओं ह्रूं अजामेळबन्धनाय